Shri Nataraja Suprabhatam or Chidambara Sabhapati Suprabhatam

श्रीनटराजसुप्रभातम् अथवा चिदम्बरसभापतिसुप्रभातं

Document Information

Text title : Nataraja Suprabhatam or Chidambara Sabhapati Suprabhatam

File name : naTarAjasuprabhAtam.itx

Category : shiva, suprabhAta

Location : doc_shiva

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan, Rajani Arjun Shankar

Latest update : October 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 16, 2026

sanskritdocuments.org

श्रीनटराजसुप्रभातम् अथवा चिदम्बरसभापतिसुप्रभातं

यस्मात्सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यमूर्तये ॥ १॥

उत्तिष्ठोत्तिष्ठ गौरीश उत्तिष्ठ वृषभध्वज ।
उत्तिष्ठ चित्सभानाथ त्रैलोक्यस्य शिवं कुरु ॥ २॥

शिवकामसुन्दरि ! शिवङ्करम्पतिं
शिवमद्य सर्वभुवनेश्वरेश्वरम् ।
प्रतिबोधयाशु भुवनस्य गुप्तये
नहि भासतेऽस्य जगदीक्षणादृते ॥ ३॥

श्रीचित्सभेशमहिषि ! प्रियान्विते
शिवताति सर्वभुवनैकमङ्गले ।
शिवकामसुन्दरि ! महीध्रनन्दिनि !
प्रियसुप्रभातमतिरम्यमस्तु ते ॥ ४॥

भास्वानुदेति परितः प्रसृता विलीना-
स्तारागणास्सह सुधाकरमण्डलेन ।
आवाति दक्षिणमरुद्धूतपद्मगन्धः
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ५॥

प्राचीदिगाप्तसुषमा मखिनश्च वृद्धा
विप्रा विनिर्ययुरथ स्वगृहात्प्रभाते ।
लब्धुं तव प्रथमवीक्षणभागधेयं
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ६॥

ब्रह्मा त्वदीयनटनातिशयं दिदृक्षुः
सत्यादुपायनकरः सहसावतीर्य ।
द्वारि त्वदालयवरस्य चिरादुपास्ते

श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ७॥

नारायणोऽपि बहुधा श्रुतमद्वितीयं
आनन्दताण्डवममन्दसुखावहं ते ।
द्रष्टुं स्वकीयभवनादुपयाति वेगात्
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ८॥

पातुं निलिम्पनिचयं प्रणवं प्रदातुं
नेतुं स्वलोकममरान्नितरामुपैतुम् ।
आज्ञां तवाप्तुमिह षण्मुख एत्य शास्ते
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ९॥

नन्दी भवत्प्रमथमण्डलयूथपोऽसौ
त्वद्दत्तसर्वभरनिर्वहणप्रवीणः ।
आज्ञाविलम्बममृषन्निव काङ्क्षति त्वां
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १०॥

भृङ्गी भवत्प्रणिधितल्लज एत्य तूर्णं
द्वारे स्थितान्निबिडितान्निखिलान् निलिम्पान् ।
सीमन्तयत्यनुनयैस्तव बोधकाले
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ११॥

एतास्तवालयमुपेत्य जनन्य आरात्
चामुण्डया कलितमङ्गलशब्दगीत्या ।
नीराजनाय धृतपात्रवरा वलन्ते
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १२॥

किं वा भवत्प्रणिधिभिः करणीयमत्र
सिद्धा वयं नियमनेन कृतार्थयास्मान् ।
इत्थं प्रभाष्य विनतान् प्रमथांश्च पश्य
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १३॥

प्राबोधने प्रथमवीक्षणपूर्णपात्र-
लाभाय लुब्धहृदयाः पद्ममुख्याः ।
प्रस्पन्दनं प्रथमजं निधयोऽर्थयन्ते
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १४॥

त्वत्किङ्करस्तव पदप्रवणः प्रवीणः
श्रीभानुकम्प इति सुश्रुतनामधेयः ।
आस्तेऽर्थयंस्तव पदैकनिकेतवासं
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १५॥

प्रागूर्ध्वताण्डवजितापि सभान्तरालान्-
निष्कासितापि निगलेन सुवेल्लितापि ।
विस्मृत्य सर्वमपि सन्निहिताऽत्र काली
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १६॥

बाणासुरस्तव सुहृत्तव भक्तभक्त-
स्त्वद्रक्षितप्रथितशोणितपत्तनेशः ।
त्वत्सेवनाय तव धाम्नि चिरादुपास्ते
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १७॥

अग्रे लसत्यखिललोकपितामहः प्रा-
ग्वेदान्मुखैर्मुखरयन् चतुरः चतुर्भिः ।
त्वय्यात्मनीनमभिमानमलं त्यजिष्यन्
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १८॥

न्यग्रोधभूरुहतले प्रथमोपदेशं
त्वत्तो लभन्त मुनयस्सनकादयो ये ।
द्रष्टुं प्रबोधमिह संसदि ते मिलन्ति
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ १९॥

श्रीनारदस्तव कृते मधुराननर्घा-
नापाद्य गीतनिचयान् स्वविपञ्चिकायाम् ।
द्वारेद्य गायति तव प्रतिबोधनार्थं
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २०॥

प्राबोधन प्रमुखषड्क्रमयार्चनाय
पातञ्जलाख्यनिजसूत्रमतीव हृद्यम् ।
श्रीमान् पतञ्जलिरुपेत्य विवक्षते तत्
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २१॥

श्रीमूलनाथचरणार्पितचित्तवृत्तिः
श्रीव्याघ्रपादमुनिरद्य तवार्चनाय ।

पुष्पोपहारनिकरस्वकरोयमास्ते
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २२॥

श्रीजैमिनिस्तव कृते कलितामनर्घां
श्रीवेदपादघटनासुभगां स्तुतिं च ।
आस्तेऽग्रतः पिपठिषुः प्रतिहारदेशे
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २३॥

दुर्वाससा तव पदाम्बुजभक्तिभारात्
स्वात्मार्पणं कलयितुं त्वयि चित्सभेशे ।
द्वारि प्रणामनिरतेन विलोक्यसे त्वं
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २४॥

सङ्क्रन्दनः सततपूजिततावकाङ्घ्रिः
दैतेयवल्कितकृतामसहामवज्ञाम् ।
इच्छन् प्रमार्ष्टुमिह तिष्ठति ते प्रसादात्
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २५॥

दिक्पालकाः करधृतामलपूर्णकुम्भाः
स्वर्लोकतः सुरभिदर्पणकुञ्जराद्यान् ।
आनीय दर्शयितुमादरतस्त्वरन्ते
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २६॥

श्रीज्ञानसङ्गतशिशुर्विबुधाग्रणीस्त्वा-
मुत्कण्ठया कवितया धुरि गातुकामः ।
द्वारे स्थितो वितनुते बहुधा प्रबन्धान्
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २७॥

माणिक्यवाचककविः सुधया सदृक्षाः
गाथास्तवैव सुतरामुचिता विचित्राः ।
गायत्यतीव मधुरं शृणु ताः स्वदेव्या
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २८॥

त्रैलोक्यनाथसदृशः किल हेमवर्मा
प्राकारमण्डपविमानवितानभागान् ।
हेम्नैव कारयितुमर्थयते नियोगं
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ २९॥

मित्राणि ते तव समास्तव जीवभूताः
मान्या नृणां मखिवरास्त्रिसहस्रसङ्ख्याः ।
आयान्त्युपायनकरा विनताः प्रभाते
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ३० ॥

भक्ताग्रणीस्तव पदाब्जपरायणोऽसौ
श्रीमानुमापतिशिवः प्रथितप्रभावः ।
आयाति नृत्यसदसीं तव केतुनेता
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ३१ ॥

श्रीविक्रमः प्रथितचोलमहीमहेन्द्र-
स्त्वत्पादपद्मविनिवेशितनैजचित्तः ।
प्राकारभित्तिकरणाय च नाथते त्वां
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ३२ ॥

नन्दः स्वकीयकुलनन्दनसौम्यशीलो
दूरात्त्वदीयमुखदर्शनलोलुपोऽसौ ।
दूरे स्थितश्च वलते विनयेन भक्त्या
श्रीचित्सभेश्वर विभो ! तव सुप्रभातम् ॥ ३३ ॥

इत्थं चिदम्बरसभापतिसुप्रभातं
ये वा पठन्ति मनुजाः प्रतिसुप्रभातम् ।
तेषां सभापतिरुदञ्चयति प्रसादं
सारूप्यसम्पदममुत्र मुदा प्रसूते ॥ ३४ ॥

॥ इति श्रीनटराजसुप्रभातं अथवा चिदम्बरसभापतिसुप्रभातं सम्पूर्णम् ॥

The first line of the verse 27 is given as
श्रीज्ञानसम्बन्ध .. विबुधाग्रणीस्त्वा
in the original Tamil PDF referenced. As one said,
the nAyanmAr referred to is “Gnanasambandhar.”
However, technically, in it the two akSharas
are missing. For reasonable chanting purpose,
the line is modified as above. If a more

reliable manuscript is found, it will be
updated.

Encoded by Aruna Narayanan
Proofread by Aruna Narayanan, Rajani Arjun Shankar

Shri Nataraja Suprabhatam or Chidambara Sabhapati Suprabhatam
pdf was typeset on October 16, 2026

Please send corrections to *sanskrit@cheerful.com*